मदनपारिजातेऽत्र विशेष उक्तः । छन्दोगाता "कृत्वाथ शौचं प्रक्षाल्य स्नात्वैव इन्द्रियोपहतस्तूपोष्य स्नात्वा" "कृत्वाथ शौचं प्रक्षाल्य पादौ हस्तौ च मृज्जलैः । निबद्धशिखकच्छस्तु द्विज आचमनं चरेत्" प्रचेताः । "अनुष्णाफेनशीताभिराचामेदिति" । आतुराणामुष्णोदकमप्यविरुद्धम् । तथाचापस्तम्बः "उदकेनातुराणाञ्च तथोष्णेनोष्णपायिनामिति" । अत्राचमनं भवतीति शेषः । योगीश्वरः "अन्तर्जानु शुचौ देशे उपविष्टउदङ्मुखः । प्राग्वा ब्राह्मेण तीर्थेन द्विजो नित्यमुपस्पृशेत् । तथा "कनिष्ठादेशिन्यङ्गुष्ठमूलान्यग्रं करस्य च । प्रजापतिपितृब्रह्मदेवतीर्थान्यनुक्रमात्" । दक्षः । "प्रक्षाल्य पादौ हस्तौ च त्रिःपिबेदम्बु वीक्षितम् । संहत्याङ्गुष्ठमूलेन द्विःप्रमृज्यात्ततोमुखम् । वीक्षितमित्येतदहर्विषयम् । "रात्रावनीक्षितेनैव शुद्धिरुक्ता मनीषिभिरिति" यमस्मरणात् मनुः । त्रिराचामेदपः पूर्व्वं द्विःप्रमृज्यात्ततोमुखम् । खानि चोपस्पृशेदद्भिरात्मानं शिरएव च" गौतमः । "त्रिश्चतुर्वा अप आचामेदिति" चतुर्ग्रहणं पित्र्यप्रचयेति केचित् । त्रिग्रहणेन तदभाव इत्यन्ये । भरद्वाजः । संहताङ्गुलिभिस्तोयं गृहीत्वा दक्षिणेन तु । मुक्ताङ्गुष्ठकनिष्ठे तु शेषेणाचमनं चरेत् । ब्राह्मेण विप्रस्तीर्थेन नित्यकालमुपस्पृशेत् । कायत्रैदशिकाभ्यां वा न पित्र्येण कदाचन । कायं प्राजापत्यं त्रैदशिकं दैवम् । यस्मिन् आचमनप्रयोगे च येन ब्राह्मादितीर्थं स्वीकृतं तेनैव स प्रयोगः कार्य्यो न तीर्थान्तरेण । दक्षः । "संहताङ्गुलिभिः पूर्व्वं आस्यमेवमुपस्पृशेत् । अङ्गुष्ठेन प्रदेशिन्या घ्राणं पश्चादनन्तरम् । अङ्गुष्ठानामिकाभ्याञ्च चक्षुःश्रोत्रे पुनः पुनः । नाभिं कनिष्ठाङ्गुष्ठाभ्यां हृदयन्तु तलेन वै । सर्वाभिश्च शिरः पश्चात् बाहू चाग्रेण संस्पृशेत् । याज्ञवल्क्यः । "अद्भिस्तु प्रकृतिस्थाभिर्हीनाभिः फेनबुद्बुदैः । त्रिःप्राश्याल्प द्विरुन्मृज्य खान्यद्भिः समुपस्पृशेत्" । अत्र विशेषमाह पैठीनसिः । "सव्ये पाणौ शेषा अपो निनयेदिति" । शेषा आचमनावशिष्टाः । बृहत्शङ्खस्त्वन्यथोपस्पर्शनमाह । "तर्ज्जन्यङ्गुष्ठयोगेन स्पृशेत् नासिकाद्वयन्ततः । अङ्गुष्ठानामिकाया योगेन श्रवणे स्पृशेत् । कनिष्ठाङ्गुष्ठयोगेन स्पृशेत् स्कन्धद्वयं ततः । नाभिञ्च हृदयं तद्वत् स्पृशेत् पाणितलेन तु । संस्पृशेच्च तथा शीर्षमिति" । शङ्खस्तु "ततोऽङ्गुलिचतुष्केण स्पृशेन्मूर्द्धानमादितः । तर्ज्जन्यङ्गुष्ठयोगेन स्पृशेन्नेत्रद्वयं पृथक् । मध्यमानामिकाभ्यान्तु स्पृशेन्नासापुटे क्रमात् । अङ्गुष्ठेन कनीयस्याः कर्णौ संयोगतः स्पृशेत् । तर्ज्जन्यङ्गुष्ठयोगेन नाभिं हृदि तु संस्पृशेत्" । पैठीनसिः । "अग्निरङ्गुष्ठमात्रेनैव सर्व्वाणि स्थानानि स्पृशेदिति" । अत्र स्वस्वशाखानुसारेण व्यवस्थितो विकल्पः । यत्र शाखायामङ्गमेव नाम्नातम् अङ्गुष्ठादिविशेषो वा नाम्नातः । तच्छाखीयानां त्वैच्छिको विकल्पः येषान्तु स्वशाखायां कतिपयाङ्गस्पर्शनं नाम्नातम् । तेषान्तु स्वशाखोक्तक्रमानुसारी शाखान्तरोक्तक्रमः अनुक्ताङ्गस्पर्शे भवतीति व्यवस्था । उदकपरिमाणमाह याज्ञवल्क्यः । हृत्कण्ठतालुगाभिश्च यथासंख्यं द्विजातयः । शुध्येरन् स्त्री च शूद्रश्च सकृत् स्पृष्टाभिरन्ततः" । अन्ततस्तालुगाभिः । हृदङ्गमापरिमाणमाह उशनाः । "मासमज्जनमात्रा हृदयङ्गमा भवन्ति" । आचमनप्रसङ्गात् सपवित्राचमने कश्चन विशेषः प्रदर्श्यते । तत्र मार्कण्डेयः । "सपवित्रेण हस्तेन कुर्य्यादाचमनक्रियाम् । नोच्छिष्टं तत्पवित्रन्तु भुक्तोच्छिष्टन्तु वर्जयेत् । एतद्दक्षिणकराभिप्रायम् । हारीतेन वामे निषेधात् । "वामहस्ते कुशानृकृत्वा समाचामति योद्विजः । उपस्पर्शो भवेत्तेन रुधिरेण मलेन चेति" । एतत् केवलवामहस्ताभिप्रायम् । हस्तद्वयाग्रयस्पर्शने गोभिलेन फलस्मरणात् । "उभयत्र स्थितैर्दर्भैः समाचामति योद्विजः । सोमपानफलं तस्य भुक्त्वा यज्ञफलं भवेदिति" । अत्र विशेषमाह हारीतः । सव्यापसव्यौ कुर्व्वीत सपवित्रकरौ बुधः । ग्रन्थिर्यस्य पवित्रस्य न तेनाचमनं भवेदिति । पवित्रलक्षणमाह कात्यायनः । "अनन्तर्गर्भिणं साग्रं कौशं द्विदलमेव च । प्रादेशमात्रं विज्ञेयं पवित्रं यत्र कुत्रचित्" । मार्कण्डेयः । "चतुर्भिः कुशपिञ्जूलैर्ब्राह्मणस्य पवित्रकम् । एकैकं नूनमुद्दिष्टं वर्णे वर्णे यथाक्रमम् । त्रिभिर्दर्भैः शान्तिकर्म्म पञ्चभिः पौष्टिकं तथा । चतुर्भिश्चाभिचाराख्यं कुर्व्वन् कुर्य्यात् पवित्रकमिति" । अथाचमननिमित्तानि तत्र मनुः । "उत्तीर्य्योदकमाचामेदवतीर्य्य तथैव च" । हारीतः । "स्त्रीशूद्रोच्छिष्टाभिभाषणे मूत्रपुरीषोत्सर्गदर्शने देवतामभिगच्छंस्तु काम आचमेत्" । अथ द्विराचमननिमित्तानि । तत्र याज्ञवल्क्यः । "स्नात्वा पीत्वा क्षुते सुप्ते भुक्त्वा रथ्योपसर्पणे । आचान्तः पुनराचामेद्वासोविपरिधाय च" बौधायनः । "भोजने हवने दाने उच्चारे च प्रतिग्रहे । हविर्भक्षणकाले वा तद्वद्द्विराचमनं स्मृतम्" । ब्रह्मपुराणे । होमे भोजन-